# Shri Gopala Stavaraja

# શ્રીગોપાલસ્તવરાજઃ

## Document Information

Text title : Shri Gopala Stavaraja

File name : gopAlastavarAjaH.itx

Category : vishhnu, stavarAja, krishna

Location : doc_vishhnu

Proofread by : Manish Gavkar

Latest update : September 24, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# શ્રીગોપાલસ્તવરાજઃ

સ્તવરાજં પ્રવક્ષ્યામિ શ્રીગોપાલસ્ય ભાવતઃ ।
ભુક્તિમુક્તિપ્રદં દિવ્યં ભક્તાનામભિવર્દ્ધનમ્ ॥ ૧॥

નવીનનીરદશ્યામો ગામ્ભીર્યાદૃષ્ટ્યગોચરઃ ।
પીતવાસાનુરાગેણ લાવણ્યૈકપરાવધિઃ ॥ ૨॥

સચ્ચિદાનન્દમન્ત્રૈકો નિત્યાખણ્ડાત્મવિગ્રહઃ ।
સદા સકામઃ સર્વાત્મા નિગમાગમસંસ્તુતઃ ॥ ૩॥

દ્વિભુજો ભુક્તિમુક્તિભ્યાં વાપ્યા પીયૂષવર્ષણઃ ।
નવકઞ્જદલાક્ષિભ્યાં સૃષ્ટિસ્થિતિકરઃ પ્રભુઃ ॥ ૪॥

ભક્તિભિર્ભૂષિતો દેવ આપાદતલમસ્તકમ્ ।
ક્રીડન્નેવ સદા બાલૈર્ગોપાલો લોકપાલકઃ ॥ ૫॥

વેદવેત્રેણ શાસ્તે ગા લોકાનુગ્રહકામ્યયા ।
સ્વાનન્દે ગોપિકાવૃન્દે વૃન્દારણ્યે પરાત્મનિ ॥ ૬॥

મન્દસ્મિતેન ભક્તાન્સ્વાન્હર્ષયન્મોહયન્પરાન્ ।
સદાત્મરાધસા દાસો ભજતાં કામધુગ્ઘરિઃ ॥ ૭॥

અક્લિષ્ટકર્મા નિર્દોષો નિર્ગુણો નિરપાશ્રયઃ ।
અપ્રાકૃતગુણોદારો નિત્યાનન્દગુણાત્મકઃ ॥ ૮॥

ગોપીભિઃ શ્રુતિભિર્ગીતઃ લીલાનુગ્રહવિગ્રહઃ ।
લીલયા યોગમાયાં યસ્તયા સર્વં કરોતિ ચ ॥ ૯॥

તપસઃ સુકૃતસ્યાપિ યોગવિજ્ઞાનયોરપિ ।
ભક્તેરનુગ્રહસ્યાક્ષ્ણા દર્શનં હ્યસ્ય સત્ફલમ્ ॥ ૧૦॥

દેહિ તદ્દર્શનં નાથ લોચને કુરુ શીતલે ।
સંસારતાપજનિતમજ્ઞાનતિમિરં હરે ॥ ૧૧॥

સર્વતઃ સાધનૈર્હીનં શિશ્નોદરપરાયણમ્ ।
દમ્ભાર્થમખિલારમ્ભં પાહિ માં કરુણાનિધે ॥ ૧૨॥

સામ્પ્રતં રમસે હ્યસ્મિન્ વ્રજે વૃન્દાવને વને ।
અજ્ઞાનતિમિરાન્ધાનામસ્માકં નાવભાસસે ॥ ૧૩॥

દેહવાક્કાયવૃત્તીનામાસુરીણાં સુરેશ્વર ।
ન શક્યસે હ્યવસ્થાનં ત્વયિ કલ્પશતૈરપિ ॥ ૧।૪॥

ન ચોત્પાદયિતું શક્યા ત્વયિ પ્રીતઃ સુખાત્મનિ ।
પ્રસાદં ભવતો હિત્વા ત્વાં પ્રાપ્તું કો ભવેત્પ્રભુઃ ॥ ૧૫॥

નિત્યાખણ્ડસુખસ્થસ્ય પૂર્ણકામસ્ય નિત્યશઃ ।
સ્વલાભપરિતુષ્ટસ્ય કથં તોષો વિધીયતામ્ ॥ ૧૬॥

સર્વત્ર સમભાવેન પશ્યતઃ પરમાત્મનઃ ।
કયા યુક્ત્યા પ્રસાદઃ સ્યાત્પ્રસન્નસ્યૈવ નિત્યદા ॥ ૧૭॥

તથાપિ તસ્ય દેવસ્ય લીલાલીલસ્ય બાલવત્ ।
પ્રસાદા નિજભક્તેષુ પ્રવર્તન્તે સ્વયં પ્રભોઃ ॥ ૧૮॥

ન રાગો વા વિરાગો વા ક્રીડિતુઃ ક્રીડને શિશોઃ ।
યથા તથા કલ્પતરોઃ પ્રસાદઃ સંશ્રિતે સ્વયમ્ ॥ ૧૯॥

અથવા જગતામીશે કિં કુતર્કો ગિરાં મિતે ।
વિશિષ્ટૈષ્ટૈરુપદિષ્ટેઽસ્મિન્ વર્તના યુજ્યતે પથિ ॥ ૨૦॥

કદા યશોદાતનયઃ કદા શ્રીનન્દનન્દનઃ ।
કદા શ્રીરાધિકાકાન્તો દીનેહાં પૂરયિષ્યતિ ॥ ૨૧॥

યથા દ્રુપદજા દીના કુન્તિકા મહિલા યથા ।
અનુગ્રહીતા ભવતાં યથા માં સ્વીકુરુ પ્રભો ॥ ૨૨॥

યદિ માં કુકૃતિં વીક્ષ્ય ઉદાસ્તેઽથ ભગવન્વિભો ।
તદા ધરણ્યાં રુષ્ટાયાં ક્વ યામિ શરણં વદ ॥ ૨૩॥

રઙ્ગેણ સાર્વભૌમસ્ય ન શક્યોપકૃતિઃ ક્વચિત્ ।
તથાપ્યયં મલાઙ્કેન તેન સમ્ભાવ્યતે ન કિમ્ ॥ ૨૪॥

અસારેઽસ્મિન્નુ સંસારે કારાગારે સ્થિતં જનમ્ ।
મામુદ્ધર મુરારે શ્રીકંસારે શરણં ગતમ્ ॥ ૨૫॥

શ્રીમચ્ચરણરાજીવરજોલિપ્સુર્મુખમ્પચ ।
સુરતં સમુપાસીનોઽભગ્નશક્તિં ભવામિ ભોઃ ॥ ૨૬॥

તિર્યક્ષુ નાથ યાદસ્સુ નારકેષુ નરેષુ વા ।
જનિર્મે ભ્રમતો નાથ ભવતાન્નાસુરેષુ ચ ॥ ૨૭॥

યત્ર ન શ્રીમતઃ સેવા કથા નો ભક્તસઙ્ગતિઃ ।
ન તત્ર મે જનિર્ભૂયાદિતિ યાચે પુનઃ પુનઃ ॥ ૨૮॥

મનસા વપુષા વાચા નાન્યં યેન સમાશ્રયે ।
તથા માં કુરુ કલ્યાણ શ્રીમન્ શ્યામ મનોહર ॥ ૨૯॥

વિહાય સકલં વિશ્વં વિશ્વેશાનપિ સર્વશઃ ।
ત્વામેવાહં પ્રપન્નોઽસ્મિ ત્વમેવ પરમા ગતિઃ ॥ ૩૦॥

વૃન્દારણ્યે તરણિતનયાતીરજે દિવ્યકુઞ્જે
    પીઠે ચિન્તામણિવરમયે વેણુમાપૂરયન્તમ્ ।
નીલામ્ભોદદ્યુતિમનુપમં પીતવાસો વસાનં
    વન્દે મુક્તાભરણકુસુમૈર્ભૂષિતં નન્દનન્દમ્ ॥ ૩૧॥

સ્તવરાજમિમં પુણ્યં શ્રીકૃષ્ણસ્ય પરાત્મનઃ ।
ભગવાન્ ભજતોઽમુષ્ય વશ્યો ભવતિ ભૂતલે ॥ ૩૨॥

ઇતિ શ્રીશાણ્ડિલ્યસંહિતાયાં પઞ્ચમે ભક્તિખણ્ડે સ્તોત્રનિરૂપણં
    નામ ષોડશોઽધ્યાયે શ્રીગોપાલસ્તવરાજઃ સમ્પૂર્ણઃ ।

Proofread by Manish Gavkar

---

*Shri Gopala Stavaraja*

pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*